International Journal of Sanskrit Research 2019; 5(5): 119-121

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 119-121
© 2019 IJSR
www.anantaajournal.com
Received: 14-07-2019
Accepted: 19-08-2019

**कृष्ण अर्याल**
विद्यावारिधि (Ph.D.) शोधच्छात्रः
संस्कृतविभागः, दिल्लीविश्वविद्यालय,
भारत।

**Correspondence**
**कृष्ण अर्याल**
विद्यावारिधि (Ph.D.) शोधच्छात्रः
संस्कृतविभागः, दिल्लीविश्वविद्यालय,
भारत।

# न्यायशास्त्रीयशाब्दबोधमीमांसा

**कृष्ण अर्याल**

**प्रस्तावना**

निखिलस्यापि जगत्प्रपञ्चस्य नियामकः व्यवहार एव। व्यवहारमन्तरा न कस्यापि प्राणिनः जीवनं सुखेन गच्छति। शब्देनैव च अयं व्यवहारः प्रवर्तते। [1] वाच्यरूपमर्थं स्वतो विज्ञाय परं प्रति बोधयितुं शब्द एव सहायक इति लोके प्रसिद्धः। अयमेव यः परबोधनरूपः व्यापारोऽथवा ज्ञातुर्यज्ज्ञानं स एव व्यवहारपदवाच्यः। अयं यो हि व्यवहारः स हि शब्दार्थसंसर्गेण विना कदापि न सम्भवति यतः संसर्गं विना शब्दः अर्थं न कदापि जनयति। यतः समेषामपि व्यवहारः संसर्गमूलक एव भवतीति कृत्वा को नाम संसर्ग इति विवेचनं प्रप्रथमं नितान्तमावश्यकम्।

सोऽयं संसर्गः शक्तिलक्षणाव्यञ्जनातात्पर्यभेदेन चतुर्विधत्वेन प्रसिद्धः सामान्यतया पदशक्तिज्ञेषु। न्यायशास्त्रन्तु केवलं द्वैविध्यमेव स्वीकरोति संसर्गस्य शक्तिलक्षणाभेदेन। [2] वृत्तिपदद्वारा व्यवहार्यः संसर्गोऽप्ययमेव। शाब्दज्ञाने पदार्थोपस्थितिः कारणं वृत्तिज्ञानञ्च पदार्थोपस्थितौ, एवञ्च शाब्दज्ञाने वृत्तिज्ञानसहकृतपदजन्यपदार्थोपस्थितिः कारणम्। अगृहीतवृत्तिकं यद्यत्पदं तस्मात् शाब्दज्ञानं न सम्भवति पदार्थोपस्थितेरभावात्। गृहीतवृत्तिकाच्च पदात् पदार्थोपस्थित्यनन्तरं शाब्दबोधो नितरां जायत इति सुतरां सिद्धत्वात् अन्वयव्यतिरेकेन तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्नविषयवृत्तिप्रयोज्यपदज्ञानजन्यपदार्थोपस्थितिः कारणमिति कार्यकारणभावो विद्यत इति नैयायिकानां नये प्रसिद्धम्। पदज्ञानाधीपदार्थोपस्थितिजन्यशाब्दबोधात्मिका प्रमा प्रत्यक्षादिप्रमादिभ्योऽतिरिक्ता इत्यवंरूपेण शाब्दीप्रमायाः प्रत्यक्षादित्रिभ्योऽतिरिक्तत्वं साध्यते नैयायिकैः यथोक्तं शब्दशक्तिप्रकाशिकाकारेण–

> साकांक्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
> सोऽयं नियन्त्रितार्थत्वात् न प्रत्यक्षं न चानुमा। [3]

परमौलुकीयाः शाब्दीप्रमायाः प्रमान्तरत्वं नाङ्गीकुर्वन्ति।

> शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते।
> अनुमानगतार्थत्वादिति वैशेषिकं मतम्।। [4]

साकांक्षशब्दज्ञानजन्यपदार्थोपस्थितिमूलकः शाब्दबोधो नियन्त्रितार्थक अस्ति अर्थात् पदोपस्थाप्य एव पदार्थः परस्परं साकाक्षस्सन् शाब्दज्ञानं जनयति। प्रत्यक्षप्रमायां पदैः अनुपस्थाप्या अपि पदार्था भासन्त इति कृत्वा प्रत्यक्षप्रमायाः शाब्दप्रमा भिन्नैवेति सिध्यति। एवमेवानुमितावपि शाब्दीप्रमाया अन्तर्भावो नैव सम्भवति, तथाहि 'गौरस्ति' एतद्वाक्याधीनजायमानं यज्ज्ञानं तद्धि अनुमित्यात्मकमेव गौरस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकांक्षाश्रयपदस्मारितत्वात् घटवदिति सामान्यानुमानेन यः

स्वधर्मिकास्तित्वान्वयबोधानुकूलपदस्मारितो भवति स अस्तितावान् भवति यथा घटः। गौरस्तितावान् अस्तिपदसमभिव्याहृतगोपदस्मारितत्वात् चक्षुर्वत्। यः अस्तिपदसमभिव्याहृतगोपदस्मारितो भवति स अस्तित्ववान् भवति एवं प्रकारेण सामान्यविशेषोभयविधव्याप्तिबलेन जायमानः अस्तित्वप्रकारकगोविशेष्यकशाब्दबोधोऽनुमितिरेव। न्यायनयेऽपि पदानामेकवाक्यतापन्नसमभिव्याहार- निश्चयस्य शाब्दज्ञानं प्रति कारणत्वस्य नियमेन तादृश एव हेतुमत्तानिश्चयस्यास्तित्वप्रकारकानुमितौ कारणत्वं स्वीकृत्य तस्याः शाब्दीप्रमाया अनुमितित्वमेव कथन्न स्वीक्रियते? यद्यपि विनष्टे भाविनि च घटे पूर्वोक्तप्रकारेण अस्तिपदसमभिव्याहृतस्वधर्मिकास्तित्वान्वयबोधानुकूलाकांक्षाश्रयपदस्मारितत्व -अस्तिपदसमभिव्याहृतगोपदस्मारितत्वयोः अविद्यमानत्वेन तत्रैव वर्तमानकालीनत्वरूपास्तित्वात्मकसाध्यस्य अविद्यमानतया उक्तहेतोः व्यभिचारितत्वं तथापि एकविधव्यभिचारज्ञानस्य विद्यमानत्वेऽपि अन्यविधव्याप्तिनिश्चयबलाद् अनुमितित्वं सिध्यति एवंप्रकारेणौलुकीयाः शाब्दीप्रमाया अन्तर्भावम् अनुमितावेव कुर्वन्ति।

एतन्न साधु, पदस्मारितत्वाभावदशायां गौरस्ति इति वाक्यजन्यवाक्यार्थबोधस्य सर्वानुभवसिद्धत्वात् वैशेषिकदिशा पदस्मारितत्वरूपहेतोरर्थेऽविद्यमानतया तत्र केनापि प्रकारेण अनुमितित्वासंभवात् तादृशबोधेऽनुमितित्वस्य प्रतिपादयितुं कथमप्यशक्यम्। वाक्यार्थबोधस्य न वाक्यजन्यपदार्थोपस्थित्यनन्तरजायमानतया वाक्यार्थबोधात् पूर्वमस्तित्वप्रकारकानुमितेरसम्भवः। अत एव मुक्तावल्याम्-

तन्न सम्यग्विना व्याप्तिबोधं शब्दादिबोधतः। [5]

तथाहि स्वार्थान्वयगोचरः बोधः सार्थकैरेव सम्पादनीयो भवति, तत्र च सार्थकत्वं नाम किम्? इति प्रश्ने उच्यते

शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्। [6]

अर्थात् यादृशः शब्दः शब्दान्तरं सहकृत्यैव स्वस्य स्वघटकस्य वा वृत्युपस्थाप्ययादृशार्थावगाहिबोधं प्रति अनुकूलः स तथाविधार्थे सार्थकः। स च सार्थकश्शब्दः त्रिविधः-प्रकृतिप्रत्ययनिपातभेदेन। सोऽयं शब्दोऽनित्यः। लोके हि कारणात् कार्योत्पत्तिर्दृश्यते, कारणाभावे न कार्योत्पत्तिः कार्यञ्च सर्वदानित्यं भवति। कार्यत्वस्यानित्यत्वयोरविनाभावदर्शनात्। शब्दस्यापि कार्यत्वादेवानित्यत्वम्। आकाशरूपद्रव्याश्रितश्च स इति कृत्वा गुणत्वम्। तदुक्तिः आकाशस्य च विज्ञेयः शब्दो वैशेषिको गुणः। [7]

शब्दरूपस्य कार्यस्य कण्ठताल्वाद्यभिघातरूपानित्यकारणजायमानत्वात् शब्दोऽप्यनित्य एवेति न्यायपरम्परा। शब्दनित्यत्ववादिनः मीमांसका द्रव्यवादिनश्च। गुणस्य हि साश्रयत्वं सर्वजनीनम्। इह च निराश्रयता तस्य दृश्यते प्रत्यक्षविरोधात्। अत एव कुमारिलमते शब्दः द्रव्यमेवेति। तथा चोक्तिः-

श्रोत्रेन्द्रियमात्रग्राह्यः शब्दः शब्दत्वजातिमान्।
द्रव्यं सर्वगतो नित्यः कुमारिलमते मतः।।
वियद्गुणत्वं शब्दस्य केचिदूचुर्मनीषिणः।
प्रत्यक्षादिविरोधात्तद् भट्टपादैरुपेक्षितम्।। [8]

शब्दस्य द्रव्यत्वं नित्यत्वञ्च यत्साधितं तन्न सम्यक् यावन्तोऽपि घटादयः पदार्थाः ते प्रयत्नानन्तरीयकत्वात् अनित्या एव तद्वदेव हि शब्दस्यापि कार्यत्वादिन्द्रियग्राह्यत्वाच्चानित्यत्वं सुतरां सिध्यति। तथा च गौतमीयं सूत्रमपीदमेव प्रत्यपादि- शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वाद् घटवत्। जयन्तभट्टोऽपि न्यायमञ्जर्यां शब्दस्यानित्यत्वमेव प्रत्यपादि। [9] तथाहि कण्ठताल्वादि-अभिघातसंयोगस्य अनित्यत्वाद् तज्जन्यकार्यशब्दोऽपि अनित्य एव। कार्यत्वानित्यत्वयोः परस्परं व्याप्तिः अत शब्दोऽनित्यः कार्यश्च। उच्चारणादूर्ध्वमनुपलब्धेः अनित्यः शब्दः, न ह्येनमुच्चरितं मुहूर्तमप्युपलभामहे। तस्मादेव विनष्ट इति अवगच्छामः। सः शब्दं करोति, कार्यः शब्दः, शब्दं कुरु, मा शब्दं कार्षीः इत्यादिव्यवहाराच्च शब्दस्य कार्यत्माञ्जस्येन सिध्यति।

शब्दानां शक्तिः शब्दशक्तिरिति व्युत्पत्तिः। तथा च शाब्दबुद्धित्वावच्छिन्नकारणतायां वृत्तिज्ञानघटकीभूता वृत्तिः कारणम्। तथा च वृत्तिः का? व्यवहर्तारः यानपि शब्दान् प्रयुञ्जते ते सार्थका नियमेनैव भवन्ति अर्थस्य प्रत्यायनं भवेदित्युररीकृत्यैव शब्दानां प्रयोगः। तथा च महाभाष्यकारः-''अर्थो गत्यर्थः शब्दप्रयोगः, अर्थ संप्रत्याययिष्यामि इति शब्दाः प्रयुज्यन्ते।''तथैव तन्त्रवार्तिककारः कुमारिलोऽपि- ''सर्वोऽपि शब्दोऽर्थप्रत्यायनार्थं प्रयुज्यते।'' यदि चार्थप्रत्यायनायैव शब्दप्रयोगस्तर्हि अयमपि विषयः नियमेन विचारणीयो यच्छदेभ्योऽर्थप्रत्ययः कथं जायत इति। तद्विधिं च प्रोवाचाचार्यपाणिनिः ''प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्'' [10] तदनु च ब्रूते आचार्यकात्यायनः ''लोकव्यवहारस्यैवार्थप्रत्यायकत्वम्'' काशिकाकारश्चेदं सूत्रं व्याख्यायन् वदति ''अन्यप्रमाणशब्देन लोकप्रमाणं गृह्यते।'' [11] अर्थबोधकता शब्दस्य स्वाभाविक्यस्ति। शब्दानामर्थज्ञानं लोकव्यवहाराद्भवति। अत एव आचार्यपाणिनिः लोकव्यवहार अर्थज्ञानसाधनमिति मत्त्वा पूर्ववर्तिनां केषाञ्चनाचार्याणां मतं प्रत्याचख्यौ। ''यदि तर्हि लोक एव एषु प्रमाणं तर्हि कि शास्त्रेण क्रियते? लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण नियमः।'' [12] अनेन ज्ञायते यत् शब्दानां प्रयोगव्यवस्था तदर्थज्ञानव्यवस्था वा लोकत एव ज्ञायते। लोके धर्मस्याधर्मस्य च व्यवस्था क्रियते व्याकरणेन। तथा च व्याकरणमतं साधुशब्दप्रयोगे धर्मः, असाधुशब्दानाञ्च प्रयोगेणाधर्मः।

शाब्दबोधमीमांसासन्दर्भे यदि नागेशस्य मतं न प्रस्तूयते तदेयं मीमांसापूर्णेव भवेत् तस्मान्नागेशमतमत्र मीमांस्यते। तथा तस्योक्तिः ''अर्थज्ञानसाधने बहुपरामृशन्नर्थज्ञानसाधनं वृत्तिज्ञानं भवति।'' तन्मते वृत्तिज्ञानाभावे शाब्दबोधः कथमपि न सम्भवति। शब्देनार्थबोधो यदि जायते तर्हि कथन्न सर्वेभ्यश्शब्देभ्यः सर्वेषां शाब्दबोधो न जायते? अत एवोच्यते तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति अन्वयेन व्यतिरेकेण च वृत्तिज्ञानजन्याया उपस्थितेः कारणत्वमवश्यमेवाभ्युपेतव्यम्। अथ च वृत्तेः स्वरूपेण शाब्दबुद्धित्वावच्छिन्नं प्रति न कारणमपितु ज्ञाताया एव वृत्तेः कारणत्वम्। यदि स्वरूपेण वृत्तेः कारणता स्वीक्रियते तदा वृत्तेः सर्वत्रैव विद्यमानत्वात् सर्वेषाप्यर्थानां बोधापत्तिरागच्छेत्। अत एव तत्पदनिष्ठाया वृत्तेः तत्पदजन्यशाब्दबोधं प्रत्येव कारणतायाराचार्यैरुक्तम्। अत एव तत्पदनिष्ठा या वृत्तिः तस्य ज्ञानाभावे तत्पदश्रवणेऽपि पुरुषस्यार्थज्ञानं न सम्भवति इति न दोषः। केवलञ्च शब्दश्रवणेनैव सर्वेषामप्यर्थानां बोधो न भवेदेतर्थं तद्वद्विषयकशाब्दबोधं प्रति तद्वन्निरूपितवृत्तिज्ञानस्य कारणतेति स्वीकर्तव्यम्। तथा च घटत्ववद्विषयकबोधे घटत्ववन्निरूपितवृत्तिज्ञानस्य हेतुत्वान्न घटपदात् अन्येषां मठादिपदानां बोधो नापि वृत्तिज्ञानाभावेऽपि

घटादिपदानां बोधः। एवं सत्त्वेऽपि गुडत्वादिधर्मवद्गुडनिरूपितवृत्तिज्ञानेन मधुरत्वादिप्रकारकबोधो न स्यादेतदर्थं प्रकारीभूतधर्मनिरूपितत्वमपि वृत्तौ निविशनीयम्। तथा च यद्धर्मप्रकारकं वृत्तिज्ञानं तद्धर्मप्रकारकशाब्दबोधः। गुडपदेन च गुडत्वप्रकारबोधस्यैव दर्शनात् मधुरत्वाद्यनेकधर्मसत्वेऽपि गुडत्वप्रकारिकैव गुडपदे वृत्तिरिति मधुरत्वप्रकारकबोधः कथमपि न जायत इति मञ्जूषायां वृत्तिनिरूपणप्रसंगे तद्धर्मावच्छिन्नशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिज्ञानविशिष्टज्ञानं कारणम्। [13] तत्र वैशिष्ट्यञ्च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वाश्रयपदविशेष्यकत्वोभयसंबन्धेन इति कार्यकारणभावः।

यदि पूर्वोक्तप्रकारेण कार्यकारणभावमङ्गीकृत्यागृहीतवृत्तिको यो यः सोऽथवा विस्मृतवृत्तिकोऽपि अथ तत्पदज्ञानाभाववतश्च शाब्दबोधो कथमपि न जायते। एवञ्च ''एकसंबन्धिज्ञानमपरसंबन्धिस्मारकमिति'' न्यायेन घटपदश्रवणे घट इति यश्शब्दः सः आकाशस्य गुणः, अतः आकाशस्य स्मरणं जायते तेन च घटपदात् आकाशोपस्थितौ घटपदे आकाशत्वावच्छिन्नार्थनिरूपितवृत्तेरभावात् न घटपदात् आकाशस्य बोधो जायते।

वृत्तेर्विषयेऽस्ति मतवैभिन्यं तत्र वैयाकरणसाहित्यिकौ तिस्रो वृत्तय इति मन्यन्ते शक्तिलक्षणाव्यञ्जनाः। नैयायिकानां च नये वृत्तैद्वैविध्यमस्ति इति प्रत्यपादि शक्तिलक्षणाभेदेन। शक्तिश्च अस्माच्छब्दादयमर्थो बोद्धव्य इति ईश्वरेच्छारूपा। इदं पदममुमर्थं बोधयतु इति वा। तत्र अस्माच्छब्दादयमर्थो बोद्धव्य इत्यत्र सन्निकृष्टमर्थं बोधयत इदंशब्दार्थस्य उच्चारणकर्मीभूतेन शब्देन सहाभेदान्वयः। अस्मच्छब्दोत्तरपञ्चम्याश्च जन्यत्वमर्थः। पञ्चम्यर्थो यज्जन्यत्वं तस्य बोद्धव्यैकदेशे बुध्धात्वर्थे बोधे आश्रयत्वसंबन्धेनान्वयः विषयत्वस्य च स्वरूपसंबन्धेनार्थेऽन्वयः, तथा च इदमभिन्नशब्दजन्यबोधविषयतावान् अर्थो भवतु इति शब्दप्रकारिका अर्थविशेष्यिका ईश्वरेच्छा शक्तिरित्यर्थः।

'इदं पदममुमर्थं बोधयतु' इति लक्षणे तु इदमर्थविषयकबोधजनकतावद् इदं पदं भवतु इत्याकारिका अर्थप्रकारिका पदविशेष्यिका ईश्वेच्छा शक्तिरिति। इयमेव शक्तिः संकेतनाम्नापि ज्ञायते। यद्यपि संकेतस्याविषयत्वरूपसंबन्धः पदेऽर्थे जन्यजनकताभावरूपे बोधे चास्ति तथापि बोधे या जन्यता तज्जनकताविषयो वाचकः, अन्यतरश्च बोधो विषयतया विषयो वाच्यः।

यद्यपि सर्वप्रथमं वाक्ये शक्तिग्रहो भवति तथापि शास्त्रीयाभ्यामावोद्वापाभ्यां विभिन्नेषु पदेषु शक्तिज्ञानं जायते। एवञ्च तार्किकाः शब्दार्थयोः किञ्चन संबन्धत्वमस्वीकुर्वन्त ईश्वरेच्छैतच्छब्दजन्यार्थबोधविषयकेश्वरज्ञानमेव शक्तिरिति स्वीकुर्वन्ति। अत एव श्रीमद्गदाधरोऽप्याह 'संकेतो लक्षणा चार्थे पदवृत्तिः'[14] वृत्तित्वञ्च शाब्दबोधानुकूलज्ञानविषयार्थप्रतियोगिक-पदानुयोगिकसम्बन्धत्वम्। शक्तिग्रहश्च व्याकरणादितो भवति। प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति नैयायिकाः अतएव चैत्रो ग्रामं गच्छति इत्यत्र ग्रामवृत्तिसंयोगानुकूलव्यापारानुकूलवर्तमानकालिककृतिमांश्चैत्र इत्येवं बोधो भवति एवंप्रकारेण सामान्येन न्यायशास्त्रे शाब्दबोधस्वरूपं यथामति विविच्य विरम्यते।

## संधर्व

1. इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
   यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।(काव्यादर्शः, 1/4)
2. वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः। न्या.सि.मु. किरणावलीसहिता,शब्दखण्डम्,पृ.292
3. श.श.प्र. ,का.सं.1
4. न्या.सि.मु. ,का.सं.140
5. न्या.सि.मु. ,का.सं.141
6. श.श.प्र. ,का.सं.6
7. न्या.सि.मु. ,का.सं.44
8. मानमेयोदयः,प्रमेयनिरूपणम्, कारिकासंख्या 130-131
9. शब्दस्य प्रत्यभिज्ञानवेलायामेव दृश्यते।
   शब्दरूपस्य विध्वंस इति तन्नित्यता कुतः? न्यायमञ्जरी प्रमाणप्रकरणम् पृ. 205, श्रीसूर्यनारायणशुक्ल,चौखम्बा पब्लिकेशन्स, 1936
10. अष्टाध्यायी 1/2/56
11. काशिका 1/2/56
12. महाभाष्यम्,पस्पशाह्निकम्
13. वैयाकरणसिद्धान्तलघुमञ्जूषा, वृत्तिनिरूपणम्।
14. शक्तिवादः टीकात्रयोपेतः;कृष्णभट्टः, चौखम्बासंस्कृतस्थान, पृ. 1